पलोल्लसितवह्निभिरह्नि तप्तास्तीव्रं महाव्रतमिवात्र चरन्ति वप्राः"। इति माघः।)

अर्गलं, क्ली, स्त्री, (अर्ज + कलच्, कुत्वम्।) कपाट-बन्धककाष्ठविशेषः। इत्यमरः॥ ऊड़्का तसला इत्यादि भाषा।

("ससम्भ्रमेन्द्रद्रुतपातितार्गला
निमिलिताक्षीव भियामरावती"।
इति काव्यप्रकाशे।
"तां सत्यनाम्नीं दृढ़तोरणार्गलां
गृहैर्विचित्रैरुपशोभितां शिवां"।
इति रामायणे।
"अथानपोढ़ार्गलमप्यगारं"। इति रघुः। प्रतिबन्धः। प्रत्यवायः। अन्तरायः।
"ईप्सितं तदवज्ञानात् विद्धिसार्गलमात्मनः"।
इति रघुवंशे।)
कल्लोले त्रि। इति मेदिनी॥ देवीमाहात्म्यपाठस्यादौ पाठ्यस्तोत्रविशेषः॥ यथा
मार्कण्डेय उवाच।
"ब्रह्मन् केन प्रकारेण दुर्गामाहात्म्यमुत्तमं।
शीघ्रं सिद्ध्यति तत्सर्व्वं कथयस्व महाप्रभो॥
ब्रह्मोवाच।
अर्गलं कीलकञ्चादौ पठित्वा कवचं पठेत्।
जपेत् सप्तशतीं पश्चात् क्रम एष शिवोदितः॥
अर्गलं दुरितं हन्ति कीलकं फलदं तथा।
कवचं रक्षते नित्यं चण्डिका त्रितयं दिशेत्॥
अर्गलं हृदये यस्य स चानर्गलवाक् सदा।
कीलकं हृदये यस्य वश्यकीलितमानसः॥
कवचं हृदये यस्य स वज्रहृदयः खलु।
ब्रह्मणा निर्म्मितं पूर्व्वं विनिश्चित्यापि चेतसा"॥
इत्यादि। तदाद्यश्लोको यथा,—
"जय त्वं देवि चामुण्डे जय भूतापहारिणि!।
जय सर्व्वगते देवि! कालरात्रि नमोऽस्तु ते"॥
तस्य शेषश्लोको यथा,—
"इदं स्तोत्रं पठित्वा च महास्तोत्रं पठेन्नरः।
सप्तशतीं समाराध्य वरमाप्नोति सम्पदं"॥
इत्यर्गलास्तोत्रं॥

अर्गलिका, स्त्री, (क्षुद्रार्गला, अर्गला गौरादित्वात् ङीष् स्वार्थे कन्।) अल्पार्गला। इति हेमचन्द्रः॥ खिल इति भाषा।

अर्घ, मूल्ये, (भ्वादि—परं—सकं सेट्।) इति कविकल्पद्रुमः॥ अर्घति गां गोपः। इति दुर्गादासः। ("परीक्षका यत्र न सन्ति देशे नार्घन्ति रत्नानि समुद्रजानि"। इति पञ्चतन्त्रे।)

अर्घः, पुं, (अर्घ + घञ्।) मूल्यं।
("कुर्य्युरर्घं यथापण्यं ततो विंशं नृपो हरेत्"।
"मणिमुक्ताप्रवालानां लौहानां तान्तवस्य च।
गन्धानाञ्च रसानाञ्च विद्यादर्घबलाबलम्"॥
इति मनुः।) पूजाविधिः। इत्यमरः॥ अयं शब्दः सामगानां सर्व्वत्राभिलापे सयकारो नपुंसकलिङ्गेनैव प्रयोज्यः अन्यवेदिनां णियकारः पुंलिङ्गेन प्रयोज्यः। इति श्राद्धतत्त्वं॥ (दूर्व्वाक्षतसर्षपपुष्पादिविरचितोदेवब्राह्मणादिसम्मानार्थः पूजोपचारभेदः। "अये वनदेवतेयं फलकुसुमपल्लवार्घेण मामुपतिष्ठते"। इति उत्तरचरिते।
"स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै"।
इति मेघदूते।
"दूर्व्वासर्षपपुष्पाणां दत्वार्घं पूर्णमञ्जलिम्"।
इति याज्ञवल्क्यः।)

अर्घीशः, पुं, (अर्घोऽस्त्यस्य इति अर्घी, तेषु ईशः।) शिवः। इति शब्दरत्नावली॥

अर्घ्यं, त्रि, (अर्ह्यते पूज्यते, अर्ह + ण्यत्, न्यङ्क्वादीनाञ्चेति कुत्वं, अर्घमर्हति इति पादार्घाभ्याञ्चेति यत् वा।) पूजनयोग्यं। पूज्यं। इति मेदिनी॥ अर्घ्यार्थं। तत्तु पूजार्थदूर्व्वाक्षतचन्दनपुष्पमिश्रितवारि। इत्यमरः॥

("अनर्घ्यमर्घ्येण तमद्रिनाथः,
स्वर्गौकसामर्च्चितमर्च्चयित्वा"।
इति कुमारसम्भवे।
"अर्घ्यमर्घ्यमितिवादिनं नृपं,
सोऽनवेक्ष्य भरताग्रजो यतः"।
इति रघुवंशे।) अर्घार्थजलम् इति अमरटीकायां भरतः॥ तत्तु सामान्यविशेषभेदेन द्विविधं। तत्राद्यस्य क्रमः। स्ववामे त्रिकोणवृत्तभूविम्बं विलिख्याधारशक्तिं पूजयित्वा अस्त्रमन्त्रेण पात्रं प्रक्षाल्य मन्त्रेण जलेनापूर्य्याङ्कुशमुद्रया मन्त्रेण सूर्य्यमण्डलात्तीर्थमावाह्य प्रणवेन गन्धपुष्पाभ्यां संपूज्य धेनुमुद्रां प्रदर्श्य प्रणवमष्टधा दशधा वा जपेत्॥ अन्त्यस्य क्रमः। स्ववामे त्रिकोणमण्डलं कृत्वा तत्र त्रिपदिकामारोप्य अस्त्रेण शङ्खं प्रक्षाल्य तदुपरि संस्थाप्य मन्त्रेण गन्धपुष्पाक्षतदूर्व्वादि तत्र निःक्षिप्य विमलजलेन विलोममातृकया मूलेन च पूरयेत् ततस्त्रिपदिकायां वह्निमण्डलपूजा शङ्खे सूर्य्यमण्डलपूजा जले सोममण्डलपूजा ततो मन्त्रेणाङ्कुशमुद्रया सूर्य्यमण्डलात्तीर्थमावाह्य मन्त्रेण स्वहृदयाद्देवतां तत्रावाह्य कूर्चमन्त्रेणावगुण्ठ्यास्त्रमन्त्रेण गालिनीमुद्रां प्रदर्श्य मन्त्रेण तज्जलं वीक्ष्य अङ्गमन्त्रैः सकलीकृत्य गन्धपुष्पाभ्यां देवतां संपूज्य तदुपरि मत्स्यमुद्रयाच्छाद्य मूलमन्त्रमष्टधा जप्त्वा धेनुमुद्रां प्रदर्श्यास्त्रेण संरक्ष्य तस्मात् किञ्चित् जलं प्रोक्षणीपात्रे निःक्षिपेत्। इति तन्त्रसारः॥

अर्घ्यं, क्ली, (अर्घ + यत्।) जरत्कारुमुनितपोवनतरूद्भूतमधु। तस्य गुणाः। चक्षुरायुर्हितकारित्वं। आमवातकफपित्तनाशित्वञ्च। इति राजवल्लभः॥

अर्च्च, क, पूजे। (चुरादि—सक—सेट्।) इति कविकल्पद्रुमः। क अर्च्चयति। गोवर्द्धनस्त्विममात्मनेपदिनं मत्वा विभ्राजसे मकरकेतनमर्च्चयन्तीत्यादि स्खलितमित्याह। इति दुर्गादासः॥

अर्च्च, ज, पूजे। (भ्वादि—सक—सेट्।) इति कविकल्पद्रुमः॥ ज अर्च्चति अर्च्चते। इति दुर्गादासः॥

अर्च्चकः, त्रि, (अर्च्चति, अर्च्च + ण्वुल्।) पूजकः। अर्च्चनाकारकः। यथा,—
"अर्च्चकस्य तपोयोगात् अर्च्चनस्यातिशायनात्।
आभिरूप्याच्च विम्बानां देवः सान्निध्यमृच्छति"॥
इति तिथ्यादितत्त्वं॥
("ब्रह्मचारी व्रती च स्यात् गुरुदेवद्विजार्च्चकः"।
इति मनुः।)

अर्च्चनं, क्ली, (अर्च्च + भावे ल्युट्।) पूजनं। यथा,—
"धनधान्यकरं नित्यं गुरुदेवद्विजार्च्चनं"।
इति राजवल्लभः॥ पूजाद्रव्ये त्रि। यथा,—
"अर्च्चकस्य तपोयोगात् अर्च्चनस्यातिशायनात्"।
इति तिथ्यादितत्त्वं।

अर्च्चना, स्त्री, (अर्च्च + युच्, टाप्।) पूजा। इति जटाधरः॥ गुरुदेवद्विजानां नित्यार्च्चनागुणाः। स्वर्गयश-आयुर्धनधान्यकारित्वं। अलक्ष्मीपापनाशित्वञ्च। इति राजवल्लभः॥

अर्च्चा, स्त्री, (अर्च्च + आधारे अङ्।) पूजा। प्रतिमा। इति मेदिनी॥ (देवादीनां पूजनं। "अर्च्चा चेत् विधितस्त्व ते वद तदा किं मोक्षलाभक्रमैः"॥ इति शिवशतके।)

अर्च्चिः, स्त्री, (अर्च्च + इन्।) अग्निशिखा। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥
("आसीदासन्ननिर्व्वाणप्रदीपार्च्चिरिवोषसि"।
इति रघुवंशे।)

अर्च्चिः, [स्] स्त्री, क्ली, (अर्च्च + इसि।) अग्निशिखा। किरणः। इत्यमरः। दीप्तिः। इत्युणादिकोषः॥ अयं शब्दः सान्त इदन्तश्च॥ ("हर्म्याणां हैमशृङ्गश्रियमिव निचयैरर्च्चिषामादधानः"। "विरम विरम वह्ने मुञ्च धूमानुबन्धं प्रकटयसि किमुच्चैरर्च्चिषां चक्रवालम्"। इति रत्नावली।)

अर्च्चितः, त्रि, (अर्च्च + कर्म्मणि क्तः।) पूजितः। इत्यमरः॥ (पूजाविधिना सम्मानितः।
"वेश्मन्येवं कृते तत्र गत्वा तान् परमार्च्चितान्"।
"अर्च्चिताश्च नरैः पौरैः पाण्डवा भरतर्षभ"।
इति महाभारते।)

अर्च्चिष्मान्, [त्] पुं, (अर्च्चिर्विद्यतेऽस्य, अर्च्चिस् + मतुप्।) अग्निः। इति हेमचन्द्रः॥ सूर्य्यः। अर्च्चिःशब्दात् अतिशये मतुप्रत्ययः॥ (त्रि, दीप्तः। तेजोविशिष्टः। प्रभावान्।) (स्वनामख्यातो देवर्षिभेदः। यदुक्तं, हरिवंशे,
"अर्च्चिष्मांस्तम्बरुश्चैव भारिश्च वदतां वरः।
नेतारो देवदेवानामेते हि तपसान्विताः"।)

अर्च्च्यः, त्रि, (ऋच् + स्तुतौ ण्यत्, अर्च्च + यत् वा।) अर्च्चनीयः। पूज्यः। इति हेमचन्द्रः॥
("मरुत्प्रयुक्ताश्च मरुत्सखाभं,
तमर्च्च्यमारादभिवर्त्तमानम्"।
इति रघुवंशे।)

अर्ज्ज, अर्ज्जने। (भ्वादि—परं—सकं सेट्।) इति कविकल्पद्रुमः॥ अर्ज्जनमलब्धस्य लाभः। यशश्चार्ज्जति यः स्थिरमिति हलायुधः। इति दुर्गादासः॥

अर्ज्ज, क संस्कारे (चुरादि—उभं—सकं—सेट्।) इति कविकल्पद्रुमः॥ क अर्ज्जयति किमपि लोकः संस्करोतीत्यर्थः। प्रतियत्ने प्रायः। अर्ज्जयति धनं परिजनः। इति रमानाथः। इति दुर्गादासः॥